N.A.
Ramayan: balkand
रामायण : बाल काण्ड
Sanskrit
Paper : Handwritten
N.A. (Very old)
70 folio
8.1"X 4.4"
Complete

रामायणः
बालकाण्ड

श्रीगणेशाय नमः॥ श्रीगुरुभ्यो नमः॥ श्रीसीतारामचंद्राय नमः॥

अप्रमेयत्रयातीतनिर्मलज्ञानमूर्तये॥ मनोगिरां विदूराय दक्षि
णामूर्तये नमः॥१॥ सूत उवाच॥ कदाचिन्नारदो योगी परानुग्रह
वांच्छया॥ पर्यटन् सकलाँल्लोकान् सत्यलोकमुपागमत्॥२॥ तत्र द
ष्ट्वा मूर्तिमद्भिश्छंदोभिः परिवेष्टितं॥ बालार्कप्रभया सम्यक्

अ०रा० भासयंतंसभागृहम्॥३॥मार्कंडेयादिमुनिभिःस्तुयमानंमुहुर्मु बा०कां०

॥१॥ हुः॥सर्वार्थगोचरज्ञानंसरस्वत्यासमन्वितम्॥४॥चतुर्मुखंज

गन्नाथंभक्ताभीष्टफलप्रदम्॥प्रणम्यदंडवद्भक्त्यातुष्टावमुनि

पुंगवः॥५॥संतुष्टस्तंमुनिंप्राहस्वयंभूर्वैष्णवोत्तमम्॥किंप्रष्टुका

मस्त्वमसितद्वदिष्यामितेमुने॥६॥इत्याकर्ण्यवचस्तस्यमुनि ॥१॥

ब्रह्माणमब्रवीत्॥त्वत्तःश्रुतंमयासर्वंपूर्वमेवशुभाशुभ

भम्॥७॥ इदानीमेकमेवास्ति श्रोतव्यं सुरसत्तम॥ तद्रहस्यमपि ब्रू
हि यदि तेऽनुग्रहो मयि॥८॥ प्रासे कलियुगे घोरे नराः पुण्यविवर्जि-
ताः॥ दुराचाररताः सर्वे सत्यवार्तापराङ्मुखाः॥९॥ परापवादनि
रताः परद्रव्याभिलाषिणः॥ परस्त्रीसक्तमनसः परहिंसापरायणा
:॥१०॥ देहात्मदृष्टयो मूढा नास्तिकाः पशुबुद्धयः॥ मातापितृकृ-

अ॰ रा॰ तद्द्वेषाः स्त्रीदेवाः कामकिंकराः ॥११॥ विप्रा लोभग्रहग्रस्ता वेदवि बा॰ कां॰
२ क्रयजीविनः ॥ धनार्जनार्थमभ्यस्तविद्यामदविमोहिताः ॥१२॥
त्यक्तस्वजातिकर्माणः प्रायशः परवंचकाः ॥ क्षत्रियाश्च तथा वै॰
श्यास्स्वधर्मत्यागशीलिनः ॥१३॥ तद्वच्छूद्राश्च ये केचित् ब्राह्मणा॰
चारतत्पराः ॥ स्त्रियश्च प्रायशो भ्रष्टा भर्त्रवज्ञाननिर्भयाः ॥१४॥ २

भ्यशङ्करद्रोहकारिण्योभविष्यंति न संशयः॥ एतेषां नष्टबुद्धिनां पर
लोकः कथं भवेत्॥१९॥ इति चिंताकुलं चित्तं जायते मम संततम्॥
लघुपायेन येनैषां परलोकगतिर्भवेत्॥१६॥ तमुपायमुपाख्याः
हि सर्ववेत्तियतो भवान्॥ इत्यृषेर्वाक्यमाकर्ण्य प्रत्युवाचांबुजा
सनः॥१७॥ साधु पृष्टं त्वया साधो वक्ष्ये तच्छृणु सादरं॥ पुरा त्रिपु

अ॰ रा॰ रहंतारं पार्वतीभक्तवत्सला ॥१८॥ श्रीरामतत्वंजिज्ञासुःप॰ बा॰ कां॰
३ प्रच्छविनयान्विता ॥ प्रियायै गिरिशस्तस्यै गूढं व्याख्यातवानुस्व
यम् ॥१९॥ पुराणोत्तममध्यात्मरामायणमिति स्मृतम् ॥ तत्पार्वती
जगद्धात्री पूजयित्वा दिवानिशम् ॥२०॥ आलोचयंती स्वानंदम॰
ग्ना तिष्ठति सांप्रतम् ॥ प्रचरिष्यति तल्लोके प्राण्यदृष्टवशाद्यदा ३

॥२१॥तस्याध्ययनमात्रेण जनायास्यंतिसद्गतिम्॥तावद्विजृंभते
पापंब्रह्महत्यापुरःसरम्॥२२॥यावज्जगतिनाध्यात्मरामायणमु
देष्यति॥तावत्कलिमहोत्साहो निःशंकंसंप्रवर्तते॥२३॥यावज्ज
गतिनाध्यात्मरामायणमुदेष्यति॥तावद्यमभटाःशूराःसंच
रिष्यंतिनिर्भया॥२४॥यावज्जगतिनाध्यात्मरामायणमुदेष्य

अ॰ रा॰ ति तावत्सर्वाणिशास्त्राणिविवदंतेपरस्परं॥२५॥तावत्स्वरूपंरामस्यदु र्बोधंमहतामपि॥ यावज्जगतिनाध्यात्मरामायणमुदेष्यति॥२६॥ वा॰ कां॰
४ अध्यात्मरामायणसंकीर्तनश्रवणादिकम्॥ फलंवक्तुंनशक्नोमि
कार्त्स्न्येनमुनिसत्तम॥२७॥तथापितस्यमाहात्म्यंवक्ष्येकिंचित्त
वानघ॥ शृणुचित्तंसमाधायशिवेनोक्तंपुरामम॥२८॥अध्या ४

त्मरामायणतः श्लोकं श्लोकार्द्धमेव वा ॥ यः पठेद्भक्तिसंयुक्तः सपा
पात्प्रमुच्यते क्षणात् ॥२९॥ यस्तु प्रत्यहमध्यात्मरामायणमनन्य
धीः ॥ यथाशक्ति वदेद्भक्त्या स जीवन्मुक्त उच्यते ॥३०॥ यो भ
क्त्याऽर्चयतेऽध्यात्मरामायणमतंद्रितः ॥ दिने दिनेऽश्वमेधस्य फ
लं तस्य भवेन्मुने ॥३१॥ यदृच्छयापि योऽध्यात्मरामायणमना

अ० रा० दरात् अन्यतः शृणुयान्मर्त्यः सोऽपिमुच्येतपातकात्॥३२॥ बा० कां
५ नमस्करोतियोध्यात्मरामायणमदूरतः॥सर्वदेवार्चनफलं
संप्राप्नोतिनसंशयः॥३३॥लिखित्वापुस्तकेऽध्यात्मरामायण
मशेषतः॥योदद्याद्रामभक्तेभ्यस्तस्यपुण्यफलंशृणु॥३४॥अ
धीतेषुचवेदेषुशास्त्रेषुव्याकृतेषुच॥यत्फलंदुर्लभंलोकेत ५

फलं तस्य संभवेत्॥३५॥एकादशिदिनेऽध्यात्मरामायणमुपोषितः॥
योरामभक्तः सदसि व्याकरोति नरोत्तमः॥तस्य पुण्यफलं वक्ष्ये शृ
णु वैष्णवसत्तम॥३६॥प्रत्यक्षरं तु गायत्री पुरश्चर्याफलं भवेत्॥उप
वासव्रतं कृत्वा श्रीरामनवमीदिने॥३७॥रात्रौ जागरितोऽध्यात्म
रामायणमनन्यधीः॥यः पठेच्छृणुयाद्वापि तस्य पुण्यं वदाम्यहम्॥

 ॥३८॥ कुरुक्षेत्रादिनिखिलपुण्यतीर्थेष्वनेकशः॥ आत्मतुल्यं ध
 नं सूर्यग्रहणे सर्वतोमुखे ॥३९॥ विप्रेभ्यो व्यासतुल्येभ्यो दत्वा य
त्फलमश्नुते ॥ तत्फलं संभवेत्तस्य सत्यं सत्यं न संशयः ॥४०॥ योगा
यते मुदाध्यात्मरामायणमहर्निशम् ॥ आज्ञां तस्य प्रतीक्षंते देवा
इंद्रपुरोगमाः ॥४१॥ पठन्नत्यहमध्यात्मरामायणमनुव्रतः ॥

यद्यत्करोति तत्कर्म ततः कोटिगुणं भवेत् ॥४२॥ तत्र श्रीरामहृदयं
यः पठेत्सुसमाहितः ॥ स ब्रह्मघ्नोऽपि पूतात्मा त्रिभिरेव दिनैर्भवेत्
॥४३॥ श्रीरामहृदयं यस्तु हनुमत्प्रतिमांतिके ॥ त्रिः पठेत्प्रत्यहं मौ
नी स सर्वेप्सितभाग्भवेत् ॥४४॥ पठन्श्रीरामहृदयं तुलस्यश्व
त्थयोर्यदि ॥ प्रत्यक्षरं प्रकुर्वीत ब्रह्महत्यां निवर्तयेत् ॥४५॥ श्री

अ०रा० रामगीतामाहात्म्यं कृत्स्नं जानाति शंकरः॥ तदर्धं गिरिजा वेत्ति॰ बा॰कां॰
७ तदर्धं वेद्म्यहं मुने॥४६॥ तत्ते किंचित्प्रवक्ष्यामि कृत्स्नं वक्तुं नश
क्यते॥ यज्ज्ञात्वा तत्क्षणाल्लोकश्चित्तशुद्धिमवाप्नुयात्॥४७॥
श्रीरामगीता यत्पापं न नाशयति नारद॥ तन्नश्यति तीर्थादौ लो ७
के क्वापि कदाचन॥४८॥ तन्न पश्याम्यहं लोके मार्गमाणोऽपि

सर्वदा॥ रामेणोपनिषत्सिंधुमुन्मथ्योत्पादितां मुदा॥ लक्ष्मणायार्पितां गीतासुधां पीत्वामरो भवेत्॥ ४९॥ जमदग्निसुतः पूर्वं कार्तवीर्यवधेच्छया॥ धनुर्विद्यामभ्यसितुं महेशस्यांतिके वसन्॥ ५०॥ अधीयमानां पार्वत्या रामगीतां प्रयत्नतः॥ श्रुत्वा गृहीत्वा शुद्धपठनारायणकलामगात्॥ ५१॥ ब्रह्महत्यादिपापानां नि

अ॰रा॰ च्छतिंयदिवा च्छसि॥रामगीतांमासमात्रंपठित्वाममुच्यतेनरः बा॰कां
६ ॥९२॥दुःप्रतिग्रहदुर्भोज्यदुरालापादिसंभवम्॥पापंयत्तत्कीर्त
नेनरामगीताविनाशयेत्॥९३॥शालग्रामशिलाग्रेचतुलस्यः
श्वत्थसन्निधौ॥यतीनांपुरतस्तद्वद्रामगीतांपठेत्तुयः॥९४॥सत
त्फलमवाप्नोतियद्वाचोपिनगोचरम्॥रामगीतांपठन्भक्त्या ६

यः श्राद्धे भोजयेद्द्विजान् ॥१५॥ तस्य ते पितरः सर्वे यांति विष्णोः
परंपदम् ॥ एकादश्यां निराहारो नियतो द्वादशी दिने ॥१६॥ स्थि
त्वागस्त्यतरोर्मूले रामगीतां पठेत्तु यः ॥ स एव राघवः साक्षात्सर्वै
देवैश्च पूज्यते ॥१७॥ विना दानं विना ध्यानं विना तीर्थावगाहन
म् ॥ रामगीतां नरो धीत्य तदनंतफलं लभेत् ॥१८॥ बहुना किं मि

अ॰रा॰ ह्योक्तेनश्रृणुनारद तत्वतः॥श्रुतिस्मृतिपुराणेतिहासागमशा॰ बा॰कां॰

१ तानिच॥अर्हेतिनात्यामध्यात्मरामायणकलामपि॥५९॥अ॰

ध्यात्मरामचरितस्यमुनीश्वरायमाहात्म्यमेतदुदितंकमलासं

नेन॥यःश्रद्धयापठतिवाश्रृणुयात्समर्त्यःप्राप्नोतिविष्णुपदवीं

स्सुरपूज्यमानः॥६०॥इतिश्रीब्रह्माण्डपुराणेउत्तरखंडे ध्यायः ६१॥ १

यः पृथ्वीभरवारणाय दिविजैः संप्रार्थितश्चिन्मयः संजातः पृ

थिवीतले रविकुले मायामनुष्योऽव्ययः ॥ निश्चक्रं हतराक्षसः

पुनरगाद्ब्रह्मत्वमाद्यं स्थिरां कीर्तिं पापहरां विधाय जगतां तं जा

नकीशं भजे ॥ ४ ॥ मोक्षैकहेतुं विश्वोद्भवस्थितिलयादिषु हेतुमे

कं मायाश्रयं विगतमायमचिंत्यमूर्तिम् ॥ आनंदसांद्रममलं

अ०रा० निजबोधरूपंसीतापतिंविदितत्वमहंनमामि॥२॥पठंतियेनि बा०कां

१० त्यमनन्यचेतसःश्रृण्वंतिचाध्यात्मिकसंज्ञितंशुभं॥रामायणंस

र्वपुराणसंमतंनिर्धूतपापाहरिमेवयांतिते॥३॥अध्यात्मरामाय

णमेवनित्यंपठेद्यदीच्छेद्भववंधमुक्तिम्॥गवांसहस्रायुतको

टिदानात्फलंलभेद्यःश्रृणुयात्सनित्यम्॥४॥पुरारिगिरिसंभू ३०

ता श्रीरामार्णवं संगता ॥ अध्यात्मरामगंगेयं पुनाति भुवनत्रयं

॥५॥ कैलासाग्रे कदाचिद्रविशतविमले मंदिरे रत्नपीठे संविष्टं

ध्याननिष्ठं त्रिनयनमभयं सेवितं सिद्धसंघैः॥ देवी वामांकसंस्था

गिरिवरतनया पार्वती भक्तिनम्रा प्राहेदं देवमीशं सकलमलहरं

वाक्यमानंदकंदम् ॥६॥ पार्वत्युवाच ॥ नमोस्तु ते देव जगन्निवा

अ०रा० ससर्वात्मदृक्त्वंपरमेश्वरोसि॥पृछामितत्वंपुरूषोत्तमस्यसनात बा०कां०
११ नंत्वंचसनोऽसि॥७॥गोप्यंयदत्यंतमनन्यवाच्यंवदंतिभक्तेषुम
हानुभावाः॥तदप्यहोऽहंतवदेवभक्ताप्रियोऽसिमेत्वंवदयत्तुपृ
ष्टं॥८॥ज्ञानंसविज्ञानमथानुभक्तिवैराग्ययुक्तंचमितंविभास्व ११
त्॥जानाम्यहंयोषिदपित्वदुक्तंयथातथाब्रूहितरंतियेन॥९॥

पृच्छामि चान्यच्च परं रहस्यं तदेव चाग्रे वद वारिजाक्ष॥ श्रीरामचं
द्रेखिललोकसारे भक्तिर्दृढा नौ भवति प्रसिद्धा॥१०॥ भक्तिः प्रसि
द्धा भवमोक्षणाय नान्यत्ततः साधनमस्ति किंचित्॥ तथापि हृत्सं
शयबंधनं मे विभेत्तुमर्हस्यमलोक्तिभिस्त्वम्॥११॥ वदंति रामं परमे
कमाद्यं निरस्तमायागुणसंप्रवाहम्॥ भजंति चाहर्निशमप्रमत्ताः

अ॰रा॰ परंपदंयांतितथैवसिद्धाः॥९२॥वदंतिकेचित्परमोपरामःस्वाविद्य बा॰कां

१२ यासंवृतमात्मसंज्ञम्॥जानातिनात्मानमतःपरेणसंबोधितोवे

दपरात्मतत्वम्॥९३॥यदिस्मजानातिकुतोविलापःसीताकृतेः

नेनकृतःपरेण॥जानातिनैवंयदिकेनसेव्यःसमोहिसर्वैरपिजी

वजातैः॥९४॥अत्रोत्तरंकिंविदितंभवद्भिस्तद्ब्रूतमेसंशयभेदिवा १२

क्यम्॥१५॥श्रीमाहादेवउवाच॥धन्यासिभक्तासिपरात्मनस्त्वंयज्ज्ञा
तुमिच्छास्तवरामतत्त्वम्॥पुरानकेनाप्यभिचोदितोःहंवक्तुंरहस्यंप
रमंनिगूढं॥१६॥त्वयाद्यभक्त्यापरिनोदितोऽहंवक्ष्येनमस्कृत्यर
घूत्तमंते॥रामःपरात्माप्रकृतेरनादिरानंदएकःपुरुषोत्तमोहि॥
१७॥स्वमाययाकृत्स्नमिदंहिसृष्ट्वानभोवदंतर्बहिरास्थितोयः॥

अ०रा० सर्वांतरस्थोपि निगूढ आत्मा स्वमायया सृष्टमिदं विचष्टे ॥१८॥ जगंति बा०का०
१३ नित्यं परितो भ्रमंति यत्सन्निधौ चुंबकलोहवद्धि ॥ एतं न जानंति विमूढचि
त्ताः स्वाविद्यया संवृतमानसा ये ॥१९॥ स्वाज्ञानमप्यात्मनि शुद्धबुद्धे
स्वारोपयंतीह निरस्तमाये ॥ संसारमेवानुसरंति ते वै पुत्रादिसक्ताः १३
पुरुकर्मयुक्ताः ॥२०॥ जानंति नैवं हृदये स्थितं वै चामीकरं कंठग

तं यथा ज्ञाः॥ यथा प्रकाशो न तु विद्यते रवौ ज्योतिः स्वभावोपरमे
ऽध्वरे तथा॥ विशुद्ध विज्ञानघनेरघूत्तमे विद्या कथं स्यात्परतः परा
त्मनि॥२१॥ यथा हि चाक्ष्णा भ्रमता गृहादिकं विनष्टदृष्टेर्भ्रमती
व दृश्यते॥ तथैव देहेंद्रियकर्तुरात्मनः कृतं परेध्यस्य जनो विमु
ह्यति॥२२॥ नाहो न रात्रिः सवितुर्यथा भवेत्प्रकाशरूपाव्यभि

अ०रा० चारतः क्वचित्॥ज्ञानंतथाज्ञा०नमिदंद्वयंहरौरामेकथंस्थास्यति बा०कां०
१४ शुद्धचिद्घने॥२३॥तस्मात्परानंदमयेरघूत्तमेविज्ञानरूपेहिन०
विद्यततमः॥अज्ञानसाक्षिण्यरविंदलोचनेमायाश्रयत्वान्नहिमो
हकारणम्॥२४॥अतस्तेकथयिष्यामिरहस्यमपिदुर्लभम्॥सी
तारामम रुत्सूनुसंवादंमोक्षसाधनम्॥२५॥पुरारामायणेरा १४

मोरावणंदेवकंटकं॥ हत्वारणेरणश्लाघीसपुत्रबलवाहनम्॥२६॥
सीतयासहसुग्रीवलक्ष्मणाभ्यांसमन्वितः॥अयोध्यामगमद्रा
मोहनूमत्प्रमुखैर्वृतः॥ २७॥ अभिषिक्तःपरिवृतोवसिष्ठाद्यैर्म
हात्मभिः॥सिंहासनेसमासीनःकोटिसूर्यसमप्रभः॥२८॥ दृष्ट्वा
तदाहनूमंतंप्रांजलिंपुरतःस्थितं॥कृतकार्यंनिराकांक्षंज्ञाना

अ०रा० पेक्षंमहामतिम् ॥२९॥ रामःसीतामुवाचेदंब्रूहितत्त्वंहनूमते॥नि बा०कां०

१५ ष्कल्मषोयंज्ञानस्यपात्रंनौनित्यभक्तिमान् ॥३०॥ तथेतिजान

कीप्राहतत्त्वंरामस्यनिश्चितम् ॥ हनूमतेप्रपन्नायसीतालोकवि

मोहिनी॥३१॥ तथेतिजानकीप्राहतत्त्वंरामस्यनिश्चितम् सीतो

वाच॥ रामंविद्धिपरंब्रह्मसच्चिदानंदमद्वयं॥ सर्वोपाधिविनिर्मु १५

त्कं सत्तामात्रमगोचरम् ॥३२॥ आनंदं निर्मलं शांतं निर्विकारं

निरंजनं ॥ सर्वव्यापिनमात्मानं स्वप्रकाशमकल्मषम् ॥ ३३॥ मां

विद्धि मूलप्रकृतिं सर्गस्थित्यंतकारिणीम् ॥ तस्य सन्निधिमात्रेण

सृजामीदमतंद्रिता ॥३४॥ तत्सान्निध्यान्मया सृष्टं तस्मिन्नारो-

प्यते बुधैः ॥ अयोध्यानगरे जन्म रघुवंशेति निर्मले ॥३५॥ वि-

अ॰रा॰ श्वामित्रसहायत्वंमखसंरक्षणंततः॥अहल्याशापशमनंचापभं बा॰का

३६ गोमहेशितुः॥३६॥ मत्पाणिग्रहणंपश्चाद्भार्गवस्यमदक्षयः॥

अयोध्यानगरेरघुवंशोतिनिर्मलेवासोमयाद्वादशवार्षि

कः॥३७॥दंडकारण्यगमनंविराधवधएवच॥मायामारीच १६

मरणंमायासीताहृतिस्तथा॥३८॥जटायुषोमोक्षलाभःकबंध

स्य तथैव च ॥ शबर्याः पूजनं पश्चात्सुग्रीवेण समागमः ॥३९॥ वालि

नश्च वधः पश्चात् सीतान्वेषणमेव च ॥ सेतुबंधश्च जलधौ लंकाया

श्च निरोधनम् ॥४०॥ रावणस्य वधो युद्धे सपुत्रस्य दुरात्मनः विभी

षणे राज्यदानं पुष्पकेण मया सह ॥४१॥ अयोध्यागमनं पश्चाद्रा

ज्ये रामाभिषेचनं ॥ एवमादीनि कर्माणि मयैवाचरितान्यपि ॥ आ

अ०रा० रोपयंतिरामेऽस्मिन्निर्विकारेऽखिलात्मनि॥४२॥ रामोनगच्छति बा०कां

१७ नतिष्ठतिनानुशोचत्याकांक्षतेत्यजतिनोनकरोतिकिंचित्॥आनं

दमूर्तिरचलःपरिणामहीनोमायागुणाननुगतोहितथाविभाति

॥४३॥ श्रीमहादेवउवाच॥ततोरामःस्वयंप्राहहनूमंतमुप

स्थितं॥शृणुतत्त्वंप्रवक्ष्यामिह्यात्मानात्मपरात्मनाम्॥४४॥ १७

आकाशस्ययथाभेदस्त्रिविधोदृश्यतेमहान्॥ जलाशयेमहाका
शस्तदवच्छिन्नएवहिप्रतिबिंबाख्यमपरंदृश्यतेत्रिविधंनभः॥
४५॥बुद्ध्यवच्छिन्नचैतन्यमेकंपूर्णमथापरं॥ आभासस्त्वपरंबिं
बभूतमेवंत्रिधाचितिः॥४६॥ साभासबुद्धेःकर्तृत्वमविच्छिन्ने
विकारिणि॥साक्षिण्यारोप्यतेभ्रांत्याजीवत्वंचतथाबुधैः॥४७॥

अ०रा० आभासस्तु मृषाबुद्धिरविद्याकार्यमेव च॥ अविच्छिन्नं तु तद्ब्र बा०का०
१८ ह्मविच्छेदस्तु विकल्पतः॥४८॥ अवच्छिन्नस्य पूर्णेन एकत्वं
प्रतिपाद्यते॥ तत्त्वमस्यादिवाक्यैश्च साभासस्याहमस्तथा॥४९॥
ऐक्यज्ञानं यदोत्पन्नं महावाक्येन चात्मनोः॥ तदाविद्या स्वकार्यै १८
श्च नश्यत्येव न संशयः॥५०॥ एतद्विज्ञाय मद्भक्तो मद्भावायो

पपद्यते॥ मद्भक्तिविमुखानां हि शास्त्रगर्तेषु मुह्यताम्॥ न ज्ञानं
न च मोक्षः स्यात्तेषां जन्मशतैरपि॥९१॥ इदं रहस्यं हृदयं ममात्म
नो मयैव साक्षात्कथितं तवानघ॥ मद्भक्तिहीनाय शठाय न त्वया
दातव्यमैन्द्रादपि राज्यतोऽधिकम्॥९२॥ श्रीमहादेव उवाच॥
एतत्तेऽभिहितं देवि श्रीरामहृदयं मया॥ अतिगुह्यतमं हृद्यं प

अ०रा० चित्रंपापशोधनम्॥१३॥साक्षाद्रामेणकथितंसर्ववेदांतसंग्रहं बा०
१९ यःपठेत्सततंभक्त्यासमुक्तोनात्रसंशयः॥१४॥ब्रह्महत्यादि
पापानिबहुजन्मार्जितान्यपि॥नश्यंत्येवनसंदेहोरामस्यवच
नंयथा॥१५॥योऽतिभ्रष्टोतिपापीपरधनपरदारेषुनित्यो
द्युतोवास्तेयीब्रह्मघ्नमातापितृवधनिरतोयोगिवृंदापकारी॥ १९

यः संपूज्याभिरामं पठति च हृदयं रामचंद्रस्य भक्त्या योगींद्रैर
प्यलभ्यं पदमिह लभते सर्वदेवैः सपूज्यम् ॥ २८ ॥ इत्यध्यात्म
रामायणे उमामहेश्वरसंवादे बालकांडे श्रीरामहृदयंनाम प्रथ
मः सर्गः १ ॥ पार्वत्युवाच ॥ धन्यास्म्यनुगृहीताऽस्मि कृता
र्थाऽस्मि जगत्प्रभो ॥ विच्छिन्नो मेऽतिसंदेहग्रंथिर्भवदनुग्र

अ॰रा॰ हात् १ त्वन्मुखाद्गलितं राम तत्त्वामृतरसायनम् पिबंत्यामेमनो बा॰का॰
२॰ देवनतृप्यतिभवापहम् २ श्रीरामस्यकथात्वत्तःश्रुतासंक्षेप
तोमया इदानींश्रोतुमिच्छामि विस्तरेणस्फुटाक्षरम् ३ श्री
महादेवउवाच शृणुदेविप्रवक्ष्यामिगुह्याद्गुह्यतरंमहत् अ
ध्यात्मरामचरितंरामेणोक्तंपुरामम ४ तदद्यकथयिष्यामि २॰

शृणु तापत्रयापहम् यच्छ्रुत्वा मुच्यते जंतुरज्ञानोत्थमहाभया
त् आप्नोति परमामृद्धिं दीर्घायुः पुत्रसंततिम् ९ भूमिर्भारे
णमग्ना दशवदनमुखाशेषरक्षोगणानां धृत्वा गोरूपमादौ दिवि
जमुनिजनैः साकमब्जासनस्य गत्वा लोकं रुदंती व्यसनमुपग
तं ब्रह्मणे प्राह सर्वं ब्रह्मा ध्यात्वा मुहूर्तं सकलमपि हृदावेदशेषा

अ॰रा॰ ॰मक॰त्वात् ६ तस्मात्क्षीरसमुद्रतीरमगमद्ब्रह्माथदेवैर्वृतो देव्या बा॰कां॰

२३ चाखिललोकहृत्स्थमजरं सर्वज्ञमीशं हरिम् अस्तौषीच्छ्रुतिसि

द्धनिर्मलपदैः स्तोत्रैः पुराणोद्भवैर्भक्त्या गद्गदया गिराऽतिविमलैरानंद

बाष्पैर्वृतः ७ ततः स्फुरत्सहस्रांशुसहस्रसदृशप्रभः आविरा॰ २३

सीद्धरिः प्राच्यां दिशां व्यपनयंस्तमः ८ कथंचिद्दृष्टवान्ब्रह्माद्

द्विभुजं स्मरूतात्मनाम् इंद्रनीलप्रतीकाशं स्मितास्यंपद्मलोचनम्
९ किरीटहारकेयूरकुंडलैःकटकादिभिः विभ्राजमानंश्रीवत्
त्सकौस्तुभप्रभयान्वितं १० स्तुवद्भिःसनकाद्यैश्चपार्षदैःपरिवे
ष्टितम् शंखचक्रगदापद्मवनमालाविराजितम् ११ स्वर्णय
ज्ञोपवीतेनस्वर्णवर्णांबरेणच १२ श्रियाभूम्याचसहितंग

अ०रा० रूढोपरिसंस्थितम् हर्षगद्गदया वाचा स्तोतुं समुपचक्रमे १३ बा०कां०

२२ ब्रह्मोवाच नतोस्मि ते पदं देव प्राणबुद्धीन्द्रियात्मभिः यच्चिं

त्यते कर्मपाशाद्धृदि नित्यं मुमुक्षुभिः १४ मायया गुणमय्या

त्वं सृजस्यवसि लुंपसि जगत्तेन न ते लेप आनंदानुभवात्मः

नः १५ तथा शुद्धिर्न दुष्टानां दानाध्ययनकर्मभिः शुद्धात्म २२

नातेयशसिसदाभक्तिमतांयथा १६ अतस्त्वदंघ्रिर्मेदृष्टश्चित्तदो
षापनुत्तये सद्योऽतर्हृदयेनित्यंमुनिभिःसात्वतैर्धृतः १७ ब्रह्माऽ
द्यैस्स्वार्थसिद्ध्यर्थमस्माभिःपूर्वसेवितः अपरोक्षानुभूत्यर्थंज्ञानि
भिर्हृदिभावितः १८ तवांघ्रिपूजानिर्माल्यतुलसीमालयाविभो
स्पृद्धेतेवक्षसिपदंलब्ध्वापिश्रीःसपत्निवत् अतस्त्वत्पादभक्तेः
१९

अ०रा० पुतवभक्तिः श्रियोऽधिका भक्तिमेवाभिवांच्छंतित्वद्भक्ताःसारवे बा०कां०
२३ दिनः २० अतस्त्वत्पादकमलेभक्तिरेवसदास्तुमे संसारामयत
सानांभेषजंभक्तिरेवते २१ इतिब्रुवंतंब्रह्माणंबभाषेभगवान्
हरिः किंकरोमीतितंवेधाःप्रत्युवाचातिहर्षितः २२ भगवन्रा
वणोनामपौलस्त्यतनयोमहान् राक्षसानामधिपतिर्मद्दत्तवर २३

दर्पितः २३ त्रिलोकीं लोकपालांश्च बाधते विश्वबाधकः मानु
षेण मृतिस्तस्य मया कल्याणकल्पिता २४ अतस्त्वं मानुषो भूत्वा
जहि देवरिपुं प्रभो श्रीभगवानुवाच कश्यपस्य वरो दत्त
स्तपसा तोषितेन मे २५ याचितः पुत्रभावाय तथेत्यंगीकृतं मया
स इदानीं दशरथो भूत्वा तिष्ठति भूतले २६ तस्याहं पुत्रतामेत्य

अ०रा० कौसल्यायांशुभेदिने चतुर्द्धात्मानमेवाहं सृजामीतरयोः पृथक् बा०का०

२४ २७ योगमायाऽपिसीतेतिजनकस्यगृहेतदा उत्पत्स्यतेतयासा

र्द्धं सर्वंसंपादयाम्यहम् २८ इत्युक्त्वांतर्दधे विष्णुर्ब्रह्मादेवानन्य

थाब्रवीत् ब्रह्मोवाच विष्णुर्मानुषरूपेणभविष्यतिरघोःकु २४

ले २९ यूयंसृजध्वंसर्वेऽपिवानरेष्वंशसंभवान् विष्णोःस०

हायंकुरुतयावत्स्थास्यतिभूतले ३० इतिदेवान्समादिश्यस०
माश्वास्यचमेदिनीम् ययौब्रह्मास्वभवनंविज्वरःसुखमास्थि
तः ३१ देवाश्चसर्वेहरिरूपधारिणःस्थिताःसहायार्थमितस्त
तोहरेः महाबलाःपर्वतवृक्षयोधिनःप्रतीक्षमाणाभगवंतमी
श्वरं ३२ इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेबा

अ॰रा॰ लकांडे द्वितीयः सर्गः २ श्रीमहादेव उवाच अथराजा दशरथः श्रीमान्सत्यपरायणः अयोध्याधिपतिर्वीरः सर्वलोके बा॰कां॰ २५

षु विश्रुतः १ सोऽनपत्यत्वदुःखेन पीडितो गुरुमेकदा वसि

ष्ठं स्वकुलाचार्यमभिवाद्येदमब्रवीत् २ स्वामिन्पुत्राः कथंमे

स्युः सर्वलक्षणलक्षिताः पुत्रहीनस्य मे राज्यं सर्वं दुःखाय कल्प २५

ते ३ ततोऽब्रवीद्वसिष्ठस्तं भविष्यंति सुतास्तव चत्वारः सत्व
संपन्ना लोकपाला इवापराः ४ शांताभर्तारमानीय ऋष्यशृंगं
तपोधनम् अस्माभिः सहितः पुत्रकामेष्टिं शीघ्रमाचर ५ तथे
तिमुनिमानीय मंत्रिभिः सहितः शुचिः यज्ञकर्मसमारंभे मुनि
भिर्वीतकल्मषैः ६ श्रद्धयाह्वयमानेऽग्नौ तप्तजांबूनदप्रभः

अ०रा० पायसंस्वर्णपात्रस्थंगृहीत्वोवाचहव्यवाट् ७ गृहाणपायसंदि बा०कां०

२६ व्यंपुत्रीयंदेवनिर्मितम् लप्स्यसेपरमात्मानंपुत्रत्वेननसंशयः

८ इत्युक्त्वापायसंदत्वाराज्ञेसोऽतर्दधेनलः ववंदेमुनिशार्दूलौ

राजालब्धमनोरथः ९ वसिष्ठऋष्यशृंगाभ्यामनुज्ञातोददौह

विः कौसल्यायै ततःसुमित्रासंप्राप्याजगृधुःपौत्रिकंचरुम् २६

सकैकेय्येअर्द्धमर्द्धंप्रययततः १०

कौसल्यातुस्वभागाईददौतस्यैमुदान्विता ११ कैकयीचस्वभा
गार्द्धंददौप्रीतिसमन्विता उपभुज्यचरुंसर्वाःस्त्रियोगर्भसमन्वि
ताः १२ देवताइवरेजुस्ताःस्वभासाराजमंदिरे दशमेमासिकौ
सल्यासुषुवेपुत्रमद्भुतम् १३ मधुमासेसितेपक्षेनवम्यांकर्कटे
शुभे पुनर्वस्वृक्षसहितेउच्चस्थेग्रहपंचके १४ मेषेपूषणिसं

अ०रा० प्राप्ते पुष्पवृष्टिसमाकुले आविरासीज्जगन्नाथः परमात्मासना वा०कां०
२८ तनः १५ नीलोत्पलदलःश्यामः पीतवासाश्चतुर्भुजः जलजा
रुणनेत्रांतः स्फुरत्कुंडलमंडितः १६ सहस्त्रार्कप्रतीकाशः कि
रीटीकुंचितालकः शंखचक्रगदापद्मवनमालाविराजितः
१७ अनुग्रहाख्यहृत्स्थेंदुसूचितस्मितचंद्रिकः करुणार २८

ससंपूर्णविशालोत्पललो-चनः श्रीवत्सहारकेयूरनूपुरादिविभूषणः
१८ दृष्ट्वातंपरमात्मानंकौसल्याविस्मयाकुला हर्षाश्रुपूर्णनयनान
त्वाप्रांजलिरब्रवीत् १९ कौसल्योवाच देवदेवनमस्तेस्तुशंखच
चक्रगदाधर परमात्माऽच्युतोनंतःपूर्णस्त्वंपुरुषोत्तमः २० वदं
त्यगोचरंवाचांबुद्ध्यादीनामतींद्रियम् त्वांवेदवादिनःसत्तामात्रं

अ०रा० ज्ञानैकविग्रहम् २१ सोऽनपत्यस्सुदुःखेन पीडितो गुरुमेकदा बा०का०
२८ वसिष्ठं स्वगुरुं कार्यमभिधायेदमब्रवीत् त्वमेवमायया विश्वंस्र
जस्यव सिहंसि च सत्वादिगुणसंयुक्तस्तुर्यएवामलः सदा २२
करोषीव न कर्ता त्वं गच्छसी न श्रृणोषि श्रृणोषीव पश्यसीव न
पश्यसि २३ अप्राणोह्यमनाः शुद्ध इत्यादिश्रुतिरब्रवीत् २८

समः सर्वेषु भूतेषु तिष्ठन्नपि न लक्ष्यसे २४ अज्ञानध्वांतचित्ता
नां व्यक्त एव सकमेधसाम् जठरे तव दृश्यंते ब्रह्माडाः परमाणवः
२५ त्वं ममोदरसंभूत इति लोकान् विडंबसे भक्तेषु पारवश्यं ते द
ष्टं तेद्य रघूत्तम २६ संसारसागरे मग्ना पतिपुत्रधनादिषु भ्रमा
मि मायया तेद्य पादमूलमुपागता २७ देव त्वद्रूपमेतन्मे सदा ति

अ०रा० ष्टुतुमानसे आवृणोतुनमांमायातवविश्वविमोहिनी २८ उपसं बा०कौ

२९ हरविश्वात्मन्नदोरूपमलौकिकम् दर्शयस्वमहानंदबालभावंसु

कोमलं २९ लक्षितात्मिगनाल्लापैस्त्तरिष्यामुत्कटंतमः श्रीभग

वानुवाच यद्यदिष्टंतवास्त्यंबतत्तद्भवतुनान्यथा ३० अहंतु

ब्रह्मणापूर्वंभूमेर्भारापनुत्तये प्रार्थितोरावणंहंतुंमानुषत्वमु २९

पागता ३१ त्वयादशरथेनाहंतपसाराधितःपुरा मत्पुत्रत्वाभिकां

क्षिण्यात्तथाकृतमनिंदिते ३२ रूपमेतत्त्वयादृष्टंप्राकृतंतपसःफ

लम् मद्दर्शनंविमोक्षायकल्पतेह्यन्यदुर्लभम् ३३ संवादमावयो

र्यस्तुपठेद्वाशृणुयादपि सयातिममसारूप्यंमरणेमत्स्मृतिंल

भेत् ३४ इत्युक्त्वामातरंरामोबालोभूत्वारुरोदह बालत्वेपींद्र

अ०रा० नीलाभोविशालाक्षोतिसुंदरः ३५ बालारुणप्रतीकाशोलालि० बा०कां०
३० ताखिललोकपः अथराजादशरथःश्रुत्वापुत्रोद्भवोत्सवं आ
नंदार्णवमग्नोसावाययौगुरुणासह ३६ रामंराजीवपत्राक्षं
दृष्ट्वाहर्षाश्रुसंप्लुतः गुरुणाजातकर्माणिकर्तव्यानिचकारसः
३७ कैकेयीचाथभरतमसूतकमलेक्षणं सुमित्रायायमौजा ३०

तौपूर्णेंदुसदृशाननौ ३८ तदा ग्रामसहस्राणि ब्राह्मणेभ्यो मुदा
ददौ स्रुवर्णानि चरत्नानि वासांसि स्रुरभीः शुभाः ३९ यस्मि
न्रमंते मुनयो विद्यया ज्ञानविप्लवे तं गुरुः प्राह रामेति रमणाद्राम इ
त्यपि ४० भरणाद्भरतो नाम लक्ष्मणं लक्षणान्वितं शत्रुघ्नं शत्रु
हंतारमेवं गुरुरभाषत ४१ लक्ष्मणो रामचन्द्रेण शत्रुघ्नो भरतेन

अं०रा० चद्वंद्वी हिसौमुन भूयचरंतौतौपायसांशानुसारतः ४२ रामस्तुलक्ष्म बा०कां०
३१ णेनाथविचरनूबाललीलयारमयामासपितरौचेष्टितैमुग्धभाषितै
४३ भालेस्वर्णमयाश्वत्थपर्णमुक्ताफलप्रभम् कंठेरत्नमणिव्रा
तमध्यद्वीपिनखांचितम् ४४ कर्णयोःस्वर्णसंपन्नरत्नार्जुनस
टालुकम् सिंजानमणिमंजीरकटिसूत्रांगदैर्वृतम् ४५ स्मि ३१

तव त्कात्यदशानमिंद्रनीलमणिप्रभम् अंगणे रिंगमाणंतंतर्णका
ननुसर्वतः ४६ दृष्ट्वादशरथोराजाकौसल्यामुमुदेतदा भोक्ष्य
माणोदशरथोराममेहीतिचासकृत् ४७ आव्हयत्यतिहर्षेण
प्रेम्णानायात्तिलीलया आनयेतिचकौसल्यामाहसासस्मितास्य
तम् ४८ धावत्यपिनशक्नोतिप्रहुंयोगिमनोगतिम् प्रहसन्स्व

अ०रा० यमायातिकर्दमांकितपाणिना ४९ किंचिद्गृहीत्वाकवलंपुनरे बा०कां०
३२ चपलायते कौसल्याजननीतस्यमासिमासिप्रकुर्वती ५० वाय
नानिविचित्राणिसमलंकृत्यराघवम् अपूपान्मोदकान्कृत्वा
कर्णशष्कुलिकास्तथा कर्णपूरांश्चविविधावर्षवृद्धौचवायन
म् ५१ गृहकृत्यंतयात्यक्तंतस्यचापल्यकारणात् एकदारघु ३२

नाथोऽसौ गतो मातरमंतिके ९२ भोजनं देहि मे मातर्न श्रुतं
कार्यसक्तया ततः क्रोधेन भांडानि लगुडेनाहनत्तदा ९३ शिक्यः
स्थं पातयामास गव्यं च नवनीतकं लक्ष्मणाय ददौ रामो भरताय य
थाक्रमम् ९४ शत्रुघ्नाय ददौ पश्चाद्दधि दुग्धं तथैव च सूदेन क
थितं मात्रे हास्यं कृत्वा प्रधावति ९५ आगतां तां विलोक्याथ ततः

अ०रा० सर्वैः पलायितम् कौसल्याधावमानापि प्रस्खलंतीपदेपदे ९६ र बा०कां०

३२ घुनाथंकरेधृत्वा किंचिन्नोवाचभामिनी बालभावंसमाश्रित्यमंदं

मंदंरुरोदह ९७ तेसर्वेलालितामात्रागाढमालिंग्ययत्नतः एव

मानंदसंदोहजगदानंदकारकः ९८ मायाबालवपुर्धृत्वारमया

मासदंपती अथकालेनतेसर्वेकौमारंप्रतिपेदिरे ९९ उपनी ३३

तावसिष्ठेनसर्वविद्याविशारदाः धनुर्वेदेचनिरताःसर्वेशास्त्रार्थवे
दिनः ६० बभूवुर्जगतांनाथालीलयानररूपिणः लक्ष्मणस्तुस
दारामममनुगच्छतिसादरम् ६१ सेव्यसेवकभावेनशत्रुघ्नोभरतं
तथा रामश्चापधरोनित्यंतूणीबाणान्वितःप्रभुः ६२ अश्वारू
ढोवनंयातिमृगयायैसलक्ष्मणः हत्वादुष्टमृगान्सर्वान्पित्रेस

अ०रा० वैन्यवेदयत् ६३ प्रातरुत्थायसस्नातः पितरावभिवाद्यच पौर० बा०कां०
३४ कार्याणिसर्वाणिकरोतिविनयान्वितः ६४ बंधुभिःसहितोनित्यं
ऋत्कामुनिभिरन्वहम् धर्मशास्त्ररहस्यानिशृणोतिव्याकरोति०
च ६५ एवंपरात्मामनुजावतारोमनुष्यलोकाननुसृत्यसर्वम्
चक्रेविकारीपरिणामहीनोविचार्यमाणेनकरोतिकिंचित् ६६ ३४

इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेबालकांडेतृतीयः

सर्गः ३ श्रीमहादेवउवाच कदाचित्कौशिकोभ्यागाद्यो

ध्यांज्वलनप्रभः द्रष्टुंरामंपरात्मानंजातंज्ञात्वास्वमायया १ दृ

ष्ट्वादशरथोराजाप्रत्युत्थायाचिरेणतु वसिष्टेनसमागम्यपूजयि

त्वायथाविधि २ अभिवाद्यमुनिंराजाप्रांजलिर्भक्तिनम्रधीः

अ०रा० कृतार्थोऽस्मि मुनींद्राहं त्वदागमनकारणात् ३ त्वद्विधा यद्गृहं बा०कां
३५ यांति तत्रैवायांति संपदः यदर्थमागतोसि त्वं ब्रूहि सत्यं करोमि
तत् ४ विश्वामित्रोपि तं प्रीतः प्रत्युवाच महामतिः अहं पर्वणि
संप्राप्ते दृष्ट्वा यष्टुं सुरानपितॄन् ५ यदारभे तदा दैत्या विघ्नं ३५
कुर्वंति नित्यशः मारीचश्च सुबाहुश्चापरे चानुचरास्तयोः ६

अतस्तयोर्वधार्थायज्येष्ठरामंप्रयच्छमे लक्ष्मणेनसहभ्रात्रातव
श्रेयोभविष्यति ७ वसिष्ठेनसहामंत्र्यदीयतांयदिरोचतेपप्रच्छ
गुरुमेकांतेराजाचिंतापरायणः ८ किंकरोमिगुरोरामंत्यक्तुंनो
सहतेमनः बहुवर्षसहस्रांतेकष्टेनोत्पादिताःसुताः ९ चत्वारो
मरतुल्यास्तेतेषांरामोतिवल्लभः रामस्त्वितोगच्छतिचेन्नजीवा

अ०रा० मिकथंचन १० प्रत्याख्यातोयदिमुनिःशापंदास्यत्यसंशयः कथं बा०कौ०
३६ श्रेयोभवेन्मह्यमसत्यंचापिनस्पृशेत् ११ वसिष्ठउवाच शृणुरा०
जन्देवगुह्यंगोपनीयंप्रयत्नतः रामोनमानुषोजातःपरमात्मासनात
नः १२ भूमेर्भारावताराय ब्रह्मणाप्रार्थितःपुरा सएवजातोभ
वनेकौसल्यायांतवानघ १३ त्वंतुप्रजापतिःपूर्वंकश्यपोब्रह्म ३६

ण:स्कत: कौसल्या चादितिर्देवमाता पूर्वंयशस्विनी भवंतौतप
उग्रंवैतेपाथेबहुवत्सरम् १४ अग्राम्यविषयौविष्णुपूजाध्याने
कतत्परौ तदाप्रसन्नोभगवान्वरदोभक्तवत्सल: १५ वृणीष्ववर
मित्युक्तेत्वंमेपुत्रोभवामल इतित्वयायाचितोसौभगवान्भूत
भावन: १६ तथेत्युक्त्वाऽद्यपुत्रस्तेजातोराम:सएवहि शेष॰

अ०रा० स्तुलक्ष्मणोराजन्राममेवान्वपद्यत १७ जातौभरतशत्रुघ्नौशं बा०कां०
३८ खचक्रगदाभृतः योगमायापिसीतेति जाताजनकनंदिनी १८
विश्वामित्रोपिरामायतांयोजयितुमागतः एतद्गुह्यतमंराजन्न
वक्तव्यंकदाचन १९ अतःप्रीतेनमनसापूजयित्वाथकौशिक
मू प्रेषयस्वरमानाथंराघवंसहलक्ष्मणम् २० वसिष्ठेनैवमुक्त ३८

स्तुराजादशरथस्तदा कृतकृत्यमिवात्मानंमेनेप्रमुदितांतरः २१

आहूयरामरामेतिलक्ष्मणेतिचसादरं आलिंग्यमूर्ध्न्यवघ्रायकौ

शिकायसमपर्यत् २२ ततोऽतिहृष्टोभगवान्विश्वामित्रःप्रतापवा

न् आशीर्भिरभिनंद्याथआगतौरामलक्ष्मणौ २३ गृहीत्वाचाप

तूणीरबाणखड्गधरौययौ किंचिद्देशमतिक्रम्यराममाहूयभक्तितः

अ॰रा॰ २४ ददौबलांचातिबलांविद्येद्वेदेवनिर्मिते ययोर्ग्रहणमात्रेणक्षु बा॰कां॰
३६ क्षामादिनजायते २५ ततउत्तीर्यगंगांतेताटकावनमागमन् वि
श्वामित्रस्तदाप्राहरामंसत्यपराक्रमम् २६ अत्रास्तिताटकाना
मराक्षसीकामरूपिणी बाधतेलोकमखिलंजहितामविचार
यन् २७ तथेतिधनुरादायसगुणंरघुनंदनः टंकारमकरोत्तेन ३६

शब्देनापूरयद्वनम् २८ तच्छ्रुत्वाऽसहमानासाताटकाघोररू
पिणी क्रोधसंमूर्च्छितारामममभिदुद्रावमेघवत् २९ तामेकेनश
रेणाशुताडयामासवक्षसि पपातविपिनेघोरावमंतीरुधिरं
बहु ३० ततोतिसुंदरीयक्षीसर्वाभरणभूषिता शापात्पिशा
चतांप्राप्तामुक्तारामप्रसादतः ३१ नत्वारामंपरिक्रम्यगतारा

अ०रा० माज्ञयादिवम् ३२ ततोऽतिहृष्टः परिरभ्यरामंमूर्ध्न्यवघ्रायवि बा०कां०
३९ चिंत्यकिंचित् सर्वास्त्रजालंसरहस्यमंत्रंप्रीत्याभिरामायददौ
मुनींद्रः ३३ इतिश्रीमध्यात्मरामायणेउमामहेश्वरसंवादे
बालकांडेचतुर्थःसर्गः ४ तत्रकामाश्रमेरम्ये
काननेमुनिसंकुले उषित्वारजनीमेकांप्रभातेप्रस्थिताःशनैः ३९
१

सिद्धाश्रमं गताः सर्वे सिद्धचारणसेवितम् विश्वामित्रेण संदिष्टा मु
नयस्तन्निवासिनः २ पूजां च महतीं चक्रू रामलक्ष्मणयोर्हुतम्
श्रीरामः कौशिकं प्राह मुने दीक्षां प्रविश्यताम् ३ दर्शयस्व महा
भाग कुतस्तौ राक्षसाधमौ तथेत्युक्त्वा मुनिर्यष्टुमारेभे मुनिभिः स
ह ४ मध्यान्हे ददृशाते तौ राक्षसौ कामरूपिणौ मारीचश्च सु०

अ०रा० बाहुश्च्यवर्षतौरुधिरास्थिनी ५ रामोपिधनुरादायद्वौबाणौसंद० बा०कां०
४० धेस्रुधीः आकर्णातंसमाकृष्यविससर्जतयोःपृथक् ६ तयो
रेकस्तुमारीचंभ्रामयन्शतयोजनं पातयामासजलधौतदद्भुतमि
वाभवत् ७ द्वितीयोऽग्निमयोबाणःस्रुबाहुमजयत्क्षणात् अ
परेलक्ष्मणेनाशुहतास्तदनुयायिनः ८ पुष्पौघैराकिरन्देवारा ४०

घवंसहलक्ष्मणम् देवदुंदुभयोनेदुस्तुष्टुवुः सिद्धचारणाः ९
विश्वामित्रस्तुसंपूज्यपूजार्हैरघुनंदनम् अंकेनिवेश्यचालिंग्य
भक्त्याबाष्पाकुलेक्षणः १० भोजयित्वासहभ्रात्रारामंपक्वफला
दिभिः पुराणवाक्यैर्मधुरैर्निनायदिवसत्रयम् ११ चतुर्थेऽह
निसंभ्रासेकौशिकोराममब्रवीत् रामराममहायज्ञंद्रष्टुंगच्छा

अ०रा० महेवयम् १२ विदेहराजनगरेजनकस्यमहात्मनः तत्रमाहेश्वरंचा बा०कां०
४१ पमस्तिन्यस्तंपिनाकिना १३ द्रस्यसित्वंमहासत्वंपूज्यजनकेनच
इत्युक्त्वामुनिभिस्ताभ्यांययौगंगासमीपगम् १४ गौतमस्याश्रमं
पुण्यंयत्राहल्यास्थितातपः दिव्यपुष्पफलोपेतंपादपैःपरिवेष्टि
तम् १५ मृगपक्षिगणैर्हीनंनानाजंतुविवर्जितम् दृष्ट्वोवाचमु ४१

निःश्रीमान्रामोराजीवलोचनः १६ कस्यैतदाश्रमपदंभातिभास्व-
च्छुभंमहत् पत्रपुष्पफलैर्युक्तंजंतुभिःपरिवर्जितम् १७ आल्हा-
दयतिमेचेतोभगवन्ब्रूहितत्वतः १८ विश्वामित्रउवाच श्रृ-
णुरामपुरावृत्तंगौतमोलोकविश्रुतः सर्वधर्मभृतांश्रेष्ठस्तपसा-
राधयन्हरिम् १९ तस्मैब्रह्माददौकन्यांमहत्यांलोकसुंदरीं

अ०रा० ब्रह्मचर्येणसंतुष्टःशुश्रूषणपरायणाम् २० तयासार्द्धमिहावा० बा०कां०
४२ सीद्गौतमस्तपतांवरः शक्रस्तुतांधर्षयितुमंतरंप्रेप्सुरन्वहम्
२१ कदाचिन्मुनिवेषेणगौतमेनिर्गतेगृहात् धर्षयित्वाथनि
रगात्त्वरितंमुनिरभ्यगात् २२ दृष्ट्वायातंस्वरूपेणमुनिःपरम
कोपनः पप्रच्छकस्त्वंदुष्टात्मन्ममरूपधरोधमः २३ सत्यं ४२

ब्रूहि न चेद्भस्म करिष्यामि न संशयः सोऽब्रवीद्देवराजो हं पाहि मां
कामकिंकरम् २४ कृतं जुगुप्सितं कर्म मया कुत्सितचेतसा
गौतमः क्रोधताम्राक्षः शशाप द्विजाधिपम् २५ यो निर्लेपट
दुष्टात्मन् सहस्त्रभगवान्भव शप्त्वा तं देवराजानं प्रविश्य स्वाश्र
मं द्रुतम् २६ दृष्ट्वाहल्यां वेपमानां प्रांजलिं गौतमोऽब्रवीत् दुष्टे

अ०रा० त्वंतिष्ठदुर्वृत्ते शिलायामाश्रमेमम २७ निराहारादिवारात्रंतपः बा०कां०
४३ परममास्थिता आतपानिलवर्षादिसहिष्णुःपरमेश्वरम् २८
ध्यायंतीराममेकाग्रंमनसाहृदिसंस्थितम् नानाजंतुविहीनोऽ
यमाश्रमोमेभविष्यति २९ एवंवर्षसहस्रेषुत्वनेकेषुगतेषु
च रामोदाशरथिःश्रीमानागमिष्यतिसानुजः ३० यदात्व ४३

दाश्रय शिलांपादाभ्यामाक्रमिष्यति तदैव धूतपापात्वंरामंसं
पूज्यभक्तितः ३१ परिक्रम्यनमस्कृत्यस्तुत्वाशापाद्विमोक्ष्य
से पूर्ववन्ममशुश्रूषांकरिष्यसियथासुखम् ३२ इत्युक्त्वा
गौतमः प्रागाद्धिमवंतंनगोत्तमम् तदाद्यहल्याभूतानामदृ
श्यास्वाश्रमेशुभे ३३ तवपादरजःस्पर्शकांक्षतेपवनाश

अ०रा० ना आस्तेयापिरघुश्रेष्ठतपोदुष्करमास्थिता ३४ पावयस्वमुनेर्भा बा०कां०

४४ र्यामहल्यांब्रह्मणःसुताम् इत्युक्त्वाराघवंहस्तेगृहीत्वामुनिपुं

गवः ३५ दर्शयामासचाहल्यामुग्रेणतपसास्थिताम् रामःशि

लांपदास्पृष्ट्वातांचापश्यत्तपोधनाम् ३६ ननामराघवोह०

ल्यांरामोहमितिचाब्रवीत् ततोदृष्ट्वारघुश्रेष्ठंपीतकौशेय ४४

वाससम् ३७ चतुर्भुजं शंखचक्रगदापंकजधारिणम् धनु
र्बाणधरं रामं लक्ष्मणेन समन्वितम् ३८ स्मितवक्त्रं पद्मनेत्रं श्री
वत्सांकितवक्षसम् नीलमाणिक्यसंकाशं द्योतयंतं दिशो दश
३९ दृष्ट्वा रामं रमानाथं हर्षविस्फारितेक्षणा गौतमस्य वचः
श्रुत्वा ज्ञात्वा नारायणं परं ४० संपूज्य विधिवद्राममर्घ्यादि

अ०रा० भिरनिंदिता हर्षाश्रुजलनेत्रोतादंडवत्प्रणिपत्यसा ४१ उ बा०का०
४६ त्थायचपुनर्दृष्ट्वारामंराजीवलोचनम् पुलकांकितसर्वांगागिरा
गद्गदयैलत ४२ अहल्योवाच अहोकृतार्थास्मिजगन्नि
वासतेपादाब्जसंलग्नरजःकणादहम् स्पृशामियत्पद्मज०
शंकरादिभिर्विमृग्यतेरंधितमानसैःसदा ४३ अहोविचि ४९

त्रंतवरामचेष्टितंमनुष्यभावेनविमोहयन्जगत् चलस्यजस्रं

चरणादिवर्जितःसंपूर्णआनंदमयोतिमायिकः ४४ यत्पादपं

कजपरागपवित्रगात्राभागीरथीभवविरंचिमुखान्पुनाति

सात्सएवममदृग्विषयोयदास्ते किंवर्ण्यतेममपुराकृतभागधे

यं ४९ मर्त्यावतारेमनुजाकृतिंहरिंरामाभिधेयंरमणीयदे

अ॰रा॰ हिनम् धनुर्धरंपद्मविशाललोचनंभजामिनित्यंनपरान्भजिष्ये वा॰का॰
४६ ४६ यत्पादपंकजरजःश्रुतिभिर्विमृग्यंयन्नाभिपंकजभवःकम
लासनश्च यन्नामसाररसिकोभगवान्पुरारिस्तंरामचंद्रमनिशं
हृदिभावयामि ४७ यस्यावतारचरितानिविरंचिलोकेगायं
तिनारदमुखाभवपद्मजाद्याः आनंदजाश्रुपरिषिक्तकुचाग्र ४८

सीमा वागीश्वरी च तमहं शरणं प्रपद्ये ४८ सोऽयं परात्मा पु
रुषः पुराण एषः स्वयंज्योतिरनंत आद्यः मायातनुं लोकविमोहि
नीयां धत्ते परानुग्रह एष रामः ४९ अयं हि विश्वोद्भवसंयमा
नामेकस्वमायागुणबिंबितोयः विरंचिविष्ण्वीश्वरनामभेदान्
धत्ते स्वतंत्रः परिपूर्ण आत्मा ९० नमोऽस्तु ते राम तवांघ्रिपंकजं

अ॰रा॰ श्रियाधृतंवक्षसिलालितंप्रियात् आक्रांतमेकेनजगत्त्रयंपुराध्येयं बा॰कां॰
४७ मुनींद्रैरभिमानवर्जितैः ९१ जगतामादिभूतस्त्वंजगत्त्वंजगदाश्र
यः सर्वभूतेष्वसंसक्त एकोभातिभवान्परः ९२ ओंकारवाच्यस्त्वं
रामवाचामविषयःपुमान् वाच्यवाचकभेदेनभवानेवजगन्मयः
९३ कार्यकारणकर्तृत्वफलसाधनभेदतः एकोविभासिराम ४७

त्वंमाययाबहुरूपया ९४ त्वन्मायामोहितधियस्त्वांनजानंति

तत्वतः मानुषंत्वाभिमन्यंतेमायिनंपरमेश्वरं ९५ आकाश

वत्त्वंसर्वत्रबहिरंतर्गतोमलः असंगोह्यचलोनित्यःशुद्धोबुद्धः

सदव्ययः ९६ योषिन्मूढाहमज्ञातेतत्वंजानेकथंविभो तस्मा

त्तेशतशोरामनमस्कुर्यामनन्यधीः ९७ देवमेयत्रकुत्रापि-

अ०रा० स्थितायाअपिसर्वदा त्वत्पादकमलेसक्ताभक्तिरेवसदास्तुमे बा०का०

४८ ९८ नमस्तेपुरुषाध्यक्षनमस्तेभक्तवत्सल नमस्तुस्तुहृषी

केशनारायणनमोऽस्तुते ९९ भवभयहरमेकंभानुकोटिप्रका

शंकरधृतशरचापंकालमेघावभासं कनकरुचिरवस्त्रंरत्न

वत्कुंडलाढ्यंकमलविशदनेत्रंसानुजंराममीडे ६० स्तुत्वैवं ४८

पुरुषंसाक्षाद्भावंपुरतःस्थितम् परिक्रम्यप्रणम्याशुसानुज्ञा
तायययौपतिम् ६१ अहल्यायाकृतंस्तोत्रंयःपठेद्भक्तिसंयुतः
समुच्यतेखिलैःपापैःपरंब्रह्माधिगच्छति ६२ पुत्राद्यर्थेपठेद्भ॰
क्त्यारामंहृदिनिधायच सर्वंसरेणलभतेवंध्याअपिसुपुत्र॰
कं ६३ सर्वान्कामानवाप्नोतिरामचन्द्रप्रसादतः ६४ ब्रह्म

अ॰रा॰ घ्नो गुरुतल्पगोऽपिपुरुषः स्तेयी सुराऽपो पि वा मातृभ्रातृ वि- बा॰
४९ हिंसकोऽपि सततं भोगैकबद्धातुरः नित्यं स्तोत्रमिदं जपन् रघु
पतिं भक्त्याहृदिस्थं स्मरन् ध्यायन्मुक्तिमुपैति किं पुनरसौ स्वा
चारयुक्तो नरः ६५ इति श्रीमदध्यात्मरामायणे उमामहेश्व
रसंवादे बालकांडे अहिल्योद्धरणं नाम पंचमः सर्गः ५ ४९

सूतउवाच ॥ विश्वामित्रोऽथतंप्राहराघवंसहलक्ष्मणम् ॥ ग-
च्छामोवत्समिथिलांजनकेनाभिपालिताम् ॥१॥ दृष्ट्वाक्रतुव
रंपश्चादयोध्यांगंतुमर्हसि ॥ इत्युक्त्वाप्रययौगंगामुत्तर्तुंसह
राघवः ॥ तस्मिन्कालेनाविकेननिषिद्धोरघुनंदनः ॥२॥ नावि
कउवाच ॥ क्षालयामितवपादपंकजंनाथदारुदृषदोःकि

अ॰रा॰ मंत॰रम् मानुषीकरणचूर्णमस्तितेपादयोरितिकथाप्रथी॰ बा॰का॰
६॰ यसी ३ पादांबुजंतेविमलंहिकृत्वापश्चात्परंतीरमहंनया
मि नोचेत्तरीसद्युवतीमलेनस्याच्चेद्विभोविद्धिकुटुंबहानि
: ४ इत्युक्त्वाक्षालितौपादौपरंतीरंततोगताः कौशिकोर
घुनाथेनसहितोमिथिलांययौ ५ विदेहस्यपुरंप्रातर्ऋषि ५॰

वाटंसमाविशत् प्राप्तंकौशिकमाकर्ण्यजनकोऽतिमुदान्वितः
६ पूजाद्रव्याणिसंगृह्यसोपाध्यायःसमाययौ दंडवत्प्रणि
पत्याथपूजयामासकौशिकम् ७ पद्मघराघवौदृष्ट्वासर्व
लक्षणसंयुतौ द्योतयंतौदिशःसर्वाःश्चंद्रसूर्याविवापरौ
८ कस्यैतौनरशार्दूलौपुत्रौदेवसमतोपमौ मनःप्रीतिक

अ०रा० रौमेऽयनरनारायणाविव॥९॥ प्रत्युवाच मुनिः प्रीतो हर्षयन् बा०का०

५१ जनकं तदा॥ पुत्रौ दशरथस्यैतौ भ्रातरौ राम लक्ष्मणौ॥१०॥ मख

संरक्षणार्थाय मयानीतौ पितुः पुरात्॥ आगच्छन् राघवो मा

र्गे ताटकां विश्वघातिनीम्॥११॥ शरणैकेन हतवान्नोदितो मे

ति विक्रमः॥ ततो ममाश्रमं गत्वा मम यज्ञविहिंसकान्॥१२॥ ५१

स्कबाहुप्रमुखान्हत्वामारीचंसागरेक्षिपत् ततोगंगातटेपुण्ये
गौतमस्याश्रमेशुभे १३ गत्वातत्रशिलारूपांगौतमस्यवधूः
स्थिता पादपंकजसंस्पर्शात्कृतामानुषरूपिणी १४ दृष्ट्वा
हल्यांनमस्कृत्यतयासम्यक्सुपूजितः इदानींद्रष्टुकामस्तेग्र
हेमाहेश्वरंधनुः १५ पूजितंराजभिःसर्वैर्दृष्टमित्यनुशुश्रुवे

अ॰रा॰ अतोदर्शयराजेंद्र शैवंचापमनुत्तमम् दृष्ट्वायोध्यांजिगमिषुः बा॰कां॰
६२ पितरंद्रष्टुमिच्छति १६ इत्युक्तोमुनिनाराजापूजार्होविधिपूज
या पूजयामासधर्मज्ञोविधिदृष्टेनकर्मणा १७ ततःसंप्रेषया
मासमंत्रिणंबुद्धिमत्तरं जनकउवाच शीघ्रमानयविश्वे
शचापंरामायदर्शय १८ ततोगतेमंत्रिवरेराजाकौशिक ६२

मब्रवीत् यदिरामोधनुर्धृत्वाकोट्यामारोपयेद्गुणं १९ तदा
मयाऽत्मजासीतादीयतेराघवायहि तथेतिकौशिकोऽप्याह
रामंसंवीक्ष्यसस्मितम् २० शीघ्रंदर्शयचापाग्र्यंरामायामित
तेजसे एवंब्रुवतिमौनीशआगताश्चापवाहकाः २१ चापं
गृहीत्वाबलिनःपंचसाहस्रसंख्यकाः घंटाशतसमायुक्तं

अ॰रा॰ मणिवज्रादिभूषितम् २२ दर्शयामासरामाय मंत्रीमंत्रवतां बा॰का॰
६३ वरः दृष्ट्वारामःप्रहृष्टात्माबध्वापरिकरंदृढम् २३ गृही
त्वावामहस्तेनलीलयातोलयन्धनुः आरोपयामासगुणंप
श्यत्स्वखिलराजसु २४ ईषदाकर्षयामासपाणिनादक्षि
णेनसः बभंजाखिलहृत्सारोदिशःशब्देनपूरयन् २५ ६३

दिशश्च विदिशश्चैव स्वर्गमर्त्यरसातलं तदद्भुतमभूत्तत्र देवा
नां दिविपश्यताम् २६ आछादयंतःकुसमैदेवास्तुतिभिरीडि
रे देवदुंदुभयोनेदुर्नृतुश्चाप्सरोगणाः २७ सीतास्वर्णम
यींमालांगृहीत्वादक्षिणेकरे स्मितवक्त्रास्वर्णवर्णासर्वाभर
णभूषिता २८ मुक्ताहारैः कर्णपत्रैःक्वणच्चरणनूपुरा

अ॰रा॰ दुकूलपरिसंवीतावस्त्रांतर्व्यंजितस्तनौ॥३०॥रामस्योपरिनि बा॰कां॰
५४ क्षिप्यस्मयमानामुदंययौ॥ततोमुमुदिरेसर्वेराजदाराःस्वलंकृ
तम्॥३१॥गवाक्षजालरंध्रेभ्योदृष्वालोकविमोहनम्॥ततोऽ
ब्रवीन्मुनिंराजासर्वशास्त्रविशारदः॥३२॥भोकौशिकमुनि
श्रेष्ठपत्रंप्रेषयसत्वरम्॥राजादशरथःशीघ्रमागच्छतुसपु ५४

त्रकः॥३३॥ विवाहार्थं कुमाराणां सदारः सहमंत्रिभिः॥ तथेतिप्रे
षयामास दूतांस्त्वरितविक्रमान्॥ ३४॥ तेगत्वा राजशार्दूलं रा
मश्चेयोन्यवेदयन्॥ श्रुत्वा रामरुतं राजा हर्षेण महताप्लुतः॥३५
मिथिलागमनार्थाय त्वरयामास मंत्रिणः॥ गच्छंतु मिथिलां
सर्वे गजाश्वरथपत्तयः॥३६॥ रथमानय मे शीघ्रं गच्छाम्य

अ०रा० द्यौवमाचिरं॥वसिष्ठस्त्वमतोयातुसदारःसहितोग्निभिः॥३७॥ बा०का०

९९ राममातॄःसमादायमुनिर्मेभगवान्गुरुः॥एवंप्रस्थाप्यसकलं

राजर्षिर्विपुलंरथम्॥३८॥महत्यासेनयासार्द्धमारुह्यत्वरितो

ययौ॥आगतंराघवंश्रुत्वाराजाहर्षसमाकुलः॥३९॥प्रत्युज्ज०

गामजनकःशतानंदपुरोधसा॥यथोक्तपूजयाप॰ज्यंपूजया०

मासतल्लतं॥४०॥रामस्तुलक्ष्मणेनाशुववंदेचरणौपितुः॥ततो
हृष्टोदशरथोरामंवचनमब्रवीत्॥४१॥दिष्ट्यापश्यामितेराममु
खंफुल्लांबुजोपमं॥मुनेरनुग्रहात्सर्वंसंपन्नंममशोभनं॥४२॥इ
त्युक्त्वाघ्रायमूर्द्धनिमालिंग्यचपुनःपुनः॥हर्षेणमहताविष्टोब्रह्मा
नंदंगतोयथा॥४३॥ततोजनकराजेनमंदिरेसन्निवेशितः॥शो

अं०रा० भनेसर्वभोगाढ्येसदारःससुतःसुखी ॥४४॥ ततःशुभेदिनेलग्ने वा०का०
९६ सुमुहूर्त्तेरघूत्तमं ॥ आनयामासधर्मज्ञोरामंसभ्रातृकंतदा ॥४५॥
रत्नस्तंभसुविस्तारेसुवितानेसुतोरणे ॥ मंडपेसर्वशोभाढ्येमुक्ता
पुष्पफलान्विते ॥४६॥ वेदविद्भिःसुसंबाधेब्राह्मणैःस्वर्णभूषि ९६
तैः॥ सुवासनीभिःपरितोनिष्ककंठैभिरावृते ॥४७॥ भेरीदुं

दुंभिनिर्घोषैर्गीतनृत्यैसमाकुले॥ दिव्यरत्नांचितेस्वर्णपीठेरामंन्य

वेशयत्॥ ४८॥ वसिष्ठंकौशिकंचैवशतानंदःपुरोहितः॥यथाक्रमंपू

जयित्वारामस्योभयपार्श्वयोः॥४९॥ स्थापयित्वासतत्राग्निंज्वाल

यित्वायथाविधि॥सीतामानीयशोभाढ्यांनानारत्नविभूषिताम्॥५०

सभार्योजनकःप्रायाद्रामंराजीवलोचनं॥पादौप्रक्षाल्यविधिवत्त

अ०रा० दपोमूर्ध्न्यधारयत् ॥११॥ या धृता मूर्ध्नि शर्वेण ब्रह्मणा मुनिभिः स- बा०कां०

१८ दा ॥ ततः सीतां करे धृत्वा साक्षतोदकपूर्वकम् ॥१२॥ रामाय प्रद

दौ प्रीत्या पाणिग्रहविधानतः ॥ सीता कमलपत्राक्षी स्वर्णमुक्तादि

भूषिता ॥१३॥ दीयते मे सुता तुभ्यं प्रीतो भव रघूत्तम इति श्री

तेन मनसा सीतां रामकरेऽर्पयन् ॥१४॥ मुमोद जनको लक्ष्मीं १८

क्षीराब्धिरिव विष्णवे ऽुर्मिलां चौरसीं कन्यां लक्ष्मणाय ददौ मु-
दा ५५ तथैव श्रुतकीर्तिं च मांडवीं भ्रातृकन्यके भरताय ददा
वेकां शत्रुघ्नायापरां ददौ ५६ चत्वारो दारसंपन्ना भ्रातरः शुभ
लक्षणाः विरेजुः प्रभया सर्वे लोकपाला इवापरे ५७ ततोऽब्रवी
द्वसिष्ठाय विश्वामित्राय मैथिलः जनकः स्वसुतोदंतं नारदेनाभि

अ०रा० भाषितं ५८ यज्ञभूमिविशुद्ध्यर्थं कर्षतो लांगलेन मे सीतामु बा०कां०
९८ खात्समुत्पन्ना कन्यका शुभलक्षणा ५९ तामद्राक्षमहं प्रीत्या
पुत्रिकाभावभाविताम् अर्पिता प्रियभार्यायै शरच्चन्द्रनिभान
नाम् ६० एकदा नारदोऽभ्यागाद्विविक्ते मयि संस्थिते रणय ९८
न्महतीं वीणां गायन्नारायणं विभुम् ६१ पूजितः सुखमासी

नो मामुवाच सकरुणान्वितः शृणुष्व वचनं गुह्यं तवाभ्युदयका

रणम् ६२ परमात्मा हृषीकेशो भक्तानुग्रहकाम्यया देवः

कार्यार्थसिद्ध्यर्थं रावणस्य वधाय च ६३ जातो राम इति ॥

ख्यातो मायामानुषवेषधृक् आस्ते दाशरथिर्भूत्वा चतु=

र्धा परमेश्वरः ६४ योगमायाऽपि सीतेति जाता वैतव वे

अ॰रा॰ श्मनि॥ अतस्त्वंराघवायैवदेहिसीतांप्रयत्नतः॥ ६५॥नान्ये- वा॰का॰
९१ भ्यःपूर्वभार्यैषारामस्यपरमात्मनः॥इत्युक्त्वाप्रययौदेवगतिंदे
वमुनिस्तदा॥६६॥ तदारभ्यमयासीता विष्णोर्लक्ष्मीर्विभा
व्यते॥ कथंमयाराघवायदीयतेजानकीशुभा॥ ६७॥इति
चिंतासमाविष्टःकार्यमेकमचिंतयम्॥ मत्पितामहगेहेतु ९१

न्यासभूतमिदंधनुः ६८ ईश्वरेणपुराक्षिप्तंपुरदाहादनंतर
म् धनुरेतत्पणंकार्यमितिचिंत्यकृतंतथा ६९ सीतापा
णिग्रहार्थायसर्वेषांमाननाशनम् त्वत्प्रसादान्मुनिश्रेष्ठरा
मोराजीवलोचनः ७० आगतोऽत्रधनुर्द्रष्टुंफलितोमेम
नोरथः अद्यमेसफलंजन्मरामत्वांसहसीतया ७१ एका

अ०रा० सनस्थंपश्यामिभ्राजमानंरवींयथा त्वत्पादांबुधरोब्रह्मासृ बा०कां
६० ष्टिचक्रप्रवर्तकः ७२ बलिस्त्वत्पादसलिलंधृत्वाभूद्दिवि
जाधिपः त्वत्पादपांसुसंस्पर्शादहल्याभर्तृशापतः ७३
सद्यएवविनिर्मुक्ताकोन्यस्त्वत्तोधिरक्षिता ७४ यत्पादपं-
कजपरागस्परागयोगिवृंदैर्जितंभवभयंजितकालचक्रैः य ६०

नामकीर्तनपराजितदुःखशोकादेवास्तमेवशरणंसततंप्रप-
द्ये ७५ इतिस्तुत्वान्नृपःप्रादाद्राघवायमहात्मने दीनाराणां
कोटिशतंरथानामयुतंतथा ७६ अश्वानांनियुतंप्रादाद्गजा
नांषट्शतंतथा पत्तीनांलक्षमेकंतुदासीनांत्रिशतंददौ ७७
दिव्यांबराणिहारांश्चमुक्तारत्नमयोज्ज्वलान् सीतायैजन-

अ॰रा॰ कःप्रादात्सीत्यादुहितृवत्सलः ७८ वसिष्ठादीन्ससंपूज्य बा॰कां॰
६९ भरतंलक्ष्मणंतथा पूजयित्वायथान्यायंतथादशरथंनृपम्
७९ प्रस्थापयामासनृपोराजानंरघुसत्तमम् सीतामालिं
ग्यरुदतींमातरःसाश्रुलोचनाः ८० श्वश्रुशुश्रूषणपरा नि-
त्यंराममनुव्रता पातिव्रत्यमुपालंब्य तिष्ठवत्सेयथासुखम् ६९

८१ प्रयाणकालेरघुनंदनस्यभेरीमृदंगानकतूर्यघोषः स्व
र्वासिभेरीघनतूर्यशद्बैः संमूर्च्छितोभूतभयंकरोऽभूत् ८२
इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेबालकांडेषष्ठ
ःसर्गः ६ सूतउवाच अथगच्छतिश्रीरामेमैथिलाद्यो
जनत्रयं निमित्तान्यतिघोराणिददर्शनृपसत्तमः १ नत्वावसि

अ॰रा॰ ष्टंपप्रच्छकिमिदंमुनिपुंगव निमित्तानीहदृश्यंतेविषमाणिसमं बा॰कां॰

६२ ततः २ वसिष्ठस्तमथप्राहभयमागामिसूच्यते पुनरप्यभ-

यंतेऽद्यशीघ्रमेवभविष्यति ३ मृगाःप्रदक्षिणंयांतिपश्यत्वां

शुभसूचकाः इत्येवंवदतस्तस्यववौघोरतरोनिलः ४ मुष्णं

श्चक्षूंषिसर्वेषांपांसुरष्टिभिरर्दयन् ततोव्रजन्ददर्शाग्रेते- ६२

जोराशिमुपस्थितं ५ कोटिसूर्यप्रतीकाशं विद्युत्पुंजसमप्रभं
तेजोराशिंददर्शाथं जामदग्न्यं प्रतापवान् ६ नीलमेघनिभंप्रां
शुंजटामंडलमंडितं धनुःपरशुपाणिंचसाक्षात्कालमिवांतक
म् ७ कार्तवीर्यांतकंरामंदृप्तक्षत्रियमर्दनम् प्राप्तंदशरथस्या
ग्रेकालमृत्युमिवापरम् ८ तंदृष्ट्वाभयसंत्रस्तोराजादशरथस्त

अ॰रा॰ दा अर्घ्यादिपूजां विस्मृत्य त्राहि त्राहीति चाब्रवीत् ९ दंडवत्स बा॰कां॰

६३ णिपत्याह पुत्रप्राणं प्रयच्छ मे इति ब्रुवंतं राजानमनादृत्य रघूत्तम

मू १० उवाच निष्ठुरं वाक्यं क्रोधात्प्रचलितेंद्रियः त्वं राम इति

नाम्ना मे चर सिक्षत्रियाधम ११ द्वंद्वयुद्धं प्रयच्छाशु यदि त्वं क्ष

त्रियो ऽसि वै पुराणं जर्जरं चापं भंक्त्वा त्वं कत्थसे मुधा १२ ६३

अस्मिंस्तु वैष्णवे चापे आरोपयसि चेद्गुणम् तदायुद्धं त्वया सा
र्द्धं करोमि रघुवंशज १३ नो चेत्सर्वान्हनिष्यामि क्षत्रियांत-
करो ह्यहम् इति ब्रुवति वै तस्मिन् चचाल वसुधा भृशम् १४
अंधकारो बभूवाथ सर्वेषामपि चक्षुषाम् रामो दाशरथिर्वीरो
वीक्ष्य तं भार्गवं रुषा १५ धनुराच्छिद्य तद्धस्तादारोप्य गुण

अ०रा० मंजसा तूणीराद्बाणमादायसंधायाकृष्यवीर्यवान् १६ उवा- बा०कां

६४ चभार्गवंराममंशृणुब्रह्मन्वचोमम लक्ष्यंदर्शयबाणस्यह्यमोघोम

मसायकः १७ लोकान्वाद्युगवापिवदशीघ्रंममाज्ञया अयं

लोकःपरोवाथत्वयागंतुंनशक्यते १८ एवंत्वांहिप्रकर्तव्यंवद

शीघ्रंममाज्ञया एवंवदतिश्रीरामेभार्गवोविकृताननः १९ सं ६५

स्मरन् पूर्वं स्वतातमिदं वचनमब्रवीत् रामराममहाबाहो जाने त्वां
परमेश्वरम् २० पुराणपुरुषं विष्णुं जगत्सर्गलयोद्भवम् बा-
ल्येऽहं तपसा विष्णुमाराधयितुमंजसा २१ चक्रतीर्थं शुभं गत्वा
तपसा विष्णुमन्वहं अतोषयं महात्मानं नारायणमनन्यधीः
२२ ततः प्रसन्नो देवेशः शंखचक्रगदाधरः उवाच मां रघुश्रेष्ठ

अ०रा० प्रसन्नमुखपंकजः २३ श्रीभगवानुवाच उत्तिष्ठतपसो बा०कां
६५ ब्रह्मन्फलितंतेतपोमहत् मच्चिदंशेनयुक्तस्त्वंजहिहैहयपुंगवम्
२४ कार्तवीर्यंपितृहणंयदर्थंतपसःश्रमः ततस्त्रिःसप्तकृत्व-
स्त्वंहत्वाक्षत्रियमंडलम् २५ कृत्स्नांभूमिंकश्यपायदत्वाशां
तिमुपावह त्रेतामुखेदाशरथिर्भूत्वारामोऽहमव्ययः २६ ६५

उत्पत्स्येपरयाशक्त्यातदाद्रक्षसिमांततः मत्तेजः पुनरादास्येख
यिदत्तंमयापुरा २७ तदातपश्चरंल्लोकेतिष्ठत्वंब्रह्मणोदिनम्
इत्युक्त्वांतर्दधेदेवस्तथासर्वंकृतंमया २८ सएवविष्णुस्त्वं
रामजातोसिब्रह्मणार्थितः मयिस्थितंतुत्वत्तेजस्त्वय्येवपुन
राहृतम् २९ अद्यमेसफलंजन्मप्रतीतोसिममप्रभो ब्र

अ०रा० ह्मादिभिरलभ्यस्त्वंमक्ततःपारगोमतः ३० त्वयिजन्मादि- बा०का०
६६ षड्भावानसंत्यज्ञानसंभवाः निर्विकारोसिपूर्णस्त्वंगमना
दिविवर्जितः ३१ यथाजलेफेनजालंधूमोवन्हौतथात्व
यि त्वदाधारात्वद्विषयामायाकार्यंसृजत्यहो ३२ याव ६६
न्मायावृतालोकास्तावत्त्वांनविजानते अविचारितसि

द्वेषा विद्या विद्या विरोधिनी ३३ अविद्याकृतदेहादिसंघाते
प्रतिबिंबता चिच्छक्तिर्जीवलोकेस्मिन्जीवइत्याभिधीयते
३४ यावद्देहमनःप्राणबुद्ध्यादिष्वभिमानवान् तावत्क
र्तृत्वभोक्तृत्वसुखदुःखादिभाग्भवेत् ३५ आत्मनःसं
सृतिर्नास्तिबुद्धेर्ज्ञानंनजात्विति अविवेकाद्द्वयंयुक्त्वासंसा

अ०रा० रीतिप्रवर्तते ३६ जडस्यचित्समायोगाच्चित्त्वंभूयाच्चितेस्त वा०कां
६७ था जडसंगाज्जडत्वंहिजलाग्न्योर्मेलनंयथा ३७ यावत्त्वत्पाद
भक्तानांसंगसौख्यंनविंदति तावत्संसारदुःखौघान्ननिवर्त्तेन्नरः
सदा ३८ सत्संगलब्धयाभक्त्यायदात्वांसमुपासते तदामाया ६७
शनैर्यातितानवंप्रतिपद्यते ३९ ततस्त्वज्ज्ञानसंपन्नःसद्गुरुः

स्तेनलभ्यते वाक्यज्ञानंगुरोर्लब्ध्वा त्वत्प्रसादाद्विमुच्यते ४०
तस्मात्त्वद्भक्तिहीनानांकल्पकोटिशतैरपि नमुक्तिशंकाविज्ञा-
नशंकानैवसुखंतथा ४१ अंतस्त्वत्पादयुगुलेभक्तिर्मेजन्म-
जन्मनि स्यात्त्वद्भक्तिमतांसंगोविद्यायाभ्यांविनश्यति लोके
त्वद्भक्तिनिरतास्त्वद्धर्मामृतवर्षिणः ४२ पुनंतिलोकमखि

अ॰रा॰ लंकिंपुनःस्वकुलोद्भवान् नमोस्तुजगतांनाथनमस्तेभक्तिभावन बा॰कां॰
६६ नमःकारुणिकानंतरामचंद्रनमोस्तुते ४३ देवयद्यत्कृतंपु
ण्यंमयालोकजिगीषया तत्सर्वंतवबाणायभूयाद्रामनमोस्तु
ते ४४ दास्येतदखिलंकामंमाकुरुष्वात्रसंशयम् ततःप्रीते
नमनसाभार्गवोराममब्रवीत् ४६ यदिमेऽनुग्रहोरामत ६६

वास्तिमधुसूदन त्वद्भक्तसंगस्त्वपादेदृढाभक्तिःसदास्तुते ४७
स्तोत्रमेतत्पठेद्यस्तुभक्तिहीनोऽपिसर्वदा त्वद्भक्तिस्तस्यविज्ञानं
भूयादंतेस्मृतिस्तव ४८ तथेतिराघवेणोक्तःपरिक्रम्यप्रणम्य
तम् पूजितस्तदनुज्ञातोमहेंद्राचलमन्वगात् ४९ राजाद
शरथोहृष्टोराममृतमिवागतम् आलिंग्यालिंग्यहर्षेण

१०१४३.

अ॰रा॰ नेत्राभ्यांजलमुत्स्रजत् ५० ततःप्रीतेनमनसास्वस्थचित्तः वा॰कां

६९ पुरंययौ रामलक्ष्मणशत्रुघ्नभरतादेवसंमिताः ९१ स्वां

स्वांभार्यामुपादायरेमिरे मातापितृभ्यांसंहृष्टोरामःसी

तासमन्वितः ९२ रेमेवैकुंठभवनेश्रियासहयथाहरिः

युधाजिन्नामकैकेयीभ्राताभरतमातुलः ९३ भरतं ६९

नेतुमागच्छत्स्वराज्यंप्रीतिसंयुतः प्रेषयामासभरतंरा
जास्नेहसमन्वितः ५४ शत्रुघ्नंचापिसंपूज्ययुधाजित
मरिंदमः कौसल्याशुशुभे [illegible] देवीरामेणसहसीतया
देवमातेवपौलोम्याशच्याशक्रेणशोभना ५५ साकेते
लोकनाथः प्रथितगुणगणोलोकसंगीतकीर्त्तिःश्रीरा

अ॰रा॰ मः सीतयास्ते ऽखिलजननिकरानंदसंदोहमूर्त्तिः नित्य बा॰कां
८० श्रीर्निर्विकारो निरवधिविभवो नित्यमायानिरासो
मायाकार्यानुसारी मनुज इव सदा भाति देवो ऽखिलेशः
९९ इतिश्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे बाल
कांडे सप्तमः सर्गः ७ श्लोकसंख्या ३६० अयंकांडः स ८०

समाप्तः